International Journal of Sanskrit Research 2020; 6(6): 20-24

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(6): 20-24
© 2020 IJSR
www.anantaajournal.com
Received: 06-09-2020
Accepted: 21-10-2020

**स्वामी जपसिद्धानन्दः**
अध्यक्षः, संस्कृत-दर्शन-विभागस्य
रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्
बेलुडमठः, हावडा-जनपदम्, पश्चिमवङ्गराज्यम् - ७११२०२

**Corresponding Author:**
**स्वामी जपसिद्धानन्दः**
अध्यक्षः, संस्कृत-दर्शन-विभागस्य
रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्
बेलुडमठः, हावडा-जनपदम्, पश्चिमवङ्गराज्यम् - ७११२०२

# दार्शनस्थाने स्थानिवत्सूत्रम्

**स्वामी जपसिद्धानन्दः**

## शोधपत्रसार
पाणिनीयाष्टाध्याय्यां "स्थानिवदादेशोऽनल्विधौ" इति सूत्रं किंप्रकारकम् इति मीमांस्यते अत्र शोधपत्रे। अत्र विषये विदुषां विविधमतानां पर्यवेक्षणम्। ततः सिद्धान्तमतपरिज्ञानम् इति अस्य पत्रस्य उपस्थापनोद्देश्यम्। "स्थानिवदादेशोऽनल्विधौ" (१.१.५६/४९) इति त्रिपदात्मकं सूत्रम्। सूत्रे द्वौ भागौ - 'स्थानिवत् आदेशः' इति विध्यात्मकः, 'अनल्विधौ' इति निषेधरूपः। महावैयाकरणेन भट्टोजिदीक्षितेन वैयाकरण-सिद्धान्तकौमुदौ - "आदेशः स्थानिवत् स्यात्, न तु स्थान्यलाश्रय-विधौ" इति अस्य सूत्रस्य वृत्तिः। यत्रैव स्थानिवद्भावेन प्रक्रिया निरुह्या तत्र सर्वत्र आदेशः स्थानितुल्यः आपाद्यः इति सूत्रांशस्य आशयः। आदेशमात्रं स्थानिवत् भवतु इत्यभिप्रायेण एव दीक्षितमहाभागेन सुष्ठु विचिन्त्य सामान्यतया उक्तम् - 'आदेशः स्थानिवत् स्यात्' इति।

## शोधप्रविधि
विश्लेषणात्मिका पद्धतिः प्राधान्येन संश्रिता। नानामतोपस्थापनावसरे च तुलनात्मकः क्रमः आदृतः। परामृष्टानां मूलग्रन्थानाम् उल्लेखे प्रायेण एम.एल्.ए सरणिः अनुसृता। प्रायेण इत्यस्य आशयः श्लोकपरिभाषादिसङ्ख्यानां च निवेशनम्। तद्यथा - (शर्मा, रघुनाथ। का.२, श्लो.७८, पृ.१४८) इत्यत्र श्लोकसङ्ख्या अध्येतृसौकर्याय योजिता। जालमूलानि मूलस्थानप्रापणसन्धिना निर्दिष्टानि कालनिर्देशेन सह। अष्टाध्यायीसूत्रसङ्ख्योल्लेखे आदौ अष्टाध्यायीसूत्रक्रमिकसङ्ख्या ततः सिद्धान्तकौमुदीसङ्ख्या उदाहृता। तद्यथा - "स्थानिवदादेशोऽनल्विधौ" (१.१.५६/४९) इत्यत्र सूत्रम् इदम् अष्टाध्याय्यां प्रथमाध्याये प्रथमपादे षट्पञ्चाशम्, सिद्धान्तकौमुद्यां च ऊनपञ्चाशम् इति बोध्यम्।

## मूलशोधपत्र
श्रीमद्भगवद्वेदपुरुषस्य मुखस्थानीयं व्याकरण्। "मुखं व्याकरणं स्मृतम्"[1] (त्रिपाठी, रामप्रसाद। पृ.२२०) इति शिक्षावचनात्। षट्सु वेदाङ्गेषु प्रधानभूतं शब्दशास्त्रम् इति तदर्थः। वेदाङ्गत्वादेव व्याकरणाध्ययनं धर्मनिमित्तं जेगीयते। व्याकरणं शक्तिग्राहकम्।

[1]छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥ पाणिनीयशिक्षा, श्लोकः ४१-४२

तथाहि - "शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्...॥" इति न्यायसिद्धान्तमुक्तावली (शुक्लः, हरिरामः। पृ.२६६)। व्याकरणनिकाये पाणिनीयकं सर्वश्रेष्ठं मन्यन्ते मनीषिणः, लोके वेदे च शब्दसंस्कारोपयोगित्वात्। पाणिनीयेषु व्याकरणग्रन्थेषु प्रधाना अष्टाध्यायी यत्र अष्टसु अध्यायेषु उपचतुःसहस्रं सूत्राणि विभज्य पठितानि। पाणिनीयाष्टके प्रथमाध्याये प्रथमपादे स्थानिवद्भावविषयकाणि विलसन्ति चत्वारि सूत्राणि - "स्थानिवदादेशोऽनल्विधौ" (१.१.५६/४९), "अचः परस्मिन् पूर्वविधौ" (१.१.५७/५०), "न पदान्त-द्विर्वचन-वरे-यलोप-स्वर-सवर्णानुस्वार-दीर्घ-जश्-चर्-विधिषु" (१.१.५८/५१), "द्विर्वचनेऽचि" (१.१.५९/२२४३) इति। तेषु स्थानिवत्सूत्रं प्रधानम्।
भारतीयज्ञानपरम्परायां नास्ति सा विद्या या न मुक्तये। साक्षात्कृतधर्माणः ऋषयः प्रत्येकं विद्यां साक्षात् परम्परया वा मोक्षार्थमेव प्रवर्तयामासुः। मोक्षरूपं लक्ष्यं विना शास्त्राणां शास्त्रत्वमेव दुरुपपादं स्यात्। शासनानुवर्तित्वस्य कष्टसाध्यस्य फलप्रतीत्यभावात्। "आत्मज्ञानावतारार्थं सर्वशास्त्र-समुद्यमः" इत्यादिवचनाच्च। एवं शास्त्रमात्रस्य मोक्षपरत्वे सिद्धे किमु वक्तव्यं व्याकरणस्य – यत् साक्षाद् वेदाङ्गं सङ्कीर्त्यते। पाणिनीयव्याकरणे सूत्राणि शब्दशासनपराणि इति मन्यन्ते मानवाः। वस्तुतस्तु मतिमलमर्दनानि इमानि इति उपातिष्ठिपत् भगवद्भाष्यकृत्। शास्त्रघटनपटुः सः उद्घटयामास सूत्रेषु निहितं दार्शनिकं तत्त्वरत्नाकरम्। यथा पस्पशाह्निकं ब्रुवाणेन, स्थानिवत्सूत्रं व्याचक्षाणेन वा शब्दनित्यत्वम् अजूगुपत्। महाभाष्ये तत्र तत्र पर्यालोचितं दार्शनिकं तत्त्वम् आवर्जयति विद्वन्मानसम्। तम् एव भगवन्तं पतञ्जलिम् अनुसिसीर्षुणा महावैयाकरणेन भर्तृहरिणा "इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः" (शुक्लः, रामगोविन्दः। का.१, श्लो.१६, पृ.२५) इत्यघोषीत्। भाष्योक्तः दर्शनविचारः दिङ्मात्रम् इह उदाजिहीर्षितः।

## सर्वपदादेशत्वात् शब्दनित्यत्वम्

"एरुः" (३.४.८६/२१९६) इत्यादिसूत्रैः अन्यस्य स्थाने अन्यः आदिश्यते। तेन शब्दे शब्दैकदेशे वा विकारः उपजायते। तथा सति शब्दस्य खण्डितत्वम् अनित्यत्वं च आपतति। पचति इत्यत्र इकाररूपस्य अवयवस्य स्थाने उकारादेशे, अवयवविकारेण शब्दानित्यताप्रसङ्गः। एतद्दोषवारणाय शब्दतत्त्वविद्भिः अत्र 'ति' इति पूर्णाक्षरस्य स्थाने 'तु' इति पूर्णाक्षरस्य आदेशः इत्युक्तम्। अत्र विषये दाघ्वदाप् इति सूत्रे भाष्यकृता उल्लिखितं संस्मरणीयम् - "युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यात्? न। नित्येषु नाम शब्देषु कूटस्थैरविचालिभिः वर्णैः भवितव्यम् अनपायोपजनविकारिभिः। आगमश्च नामापूर्वः शब्दोपजनः॥ अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः॥ बाढं युक्तम्। शब्दान्तरैरिह भावितव्यम्। तत्र शब्दान्तरे शब्दान्तरस्य प्रतिपत्तिर्युक्ता॥ आदेशास्तर्हीमे भविष्यन्ति - अनागमकानां सागमकाः। तत् कथम्? 'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः। एकमात्रविकारे हि नित्यत्वं नोपपद्यते॥'" (शास्त्री, भार्गवः। भा.१, पृ. २९०) इति। शब्दस्य आदौ मध्ये अन्ते वा विकारे जायमाने शब्दानित्यतापत्तिः इत्यतः दाक्षीपुत्रस्य पाणिनेः मते पदस्य पदादेशः एव इष्टः इति कारिकार्थः। ननु तथाऽपि अवयवस्यैव अवयवादेशः खलु प्रतीयते। 'ति' इत्येतत् पचति इत्यस्य अवयवः, 'तु' इत्येतत् पचतु इत्यस्य - इति चेत्। सत्यम्, तथा प्रतीयते। वस्तुतस्तु अत्र कारिकायां 'पद'-पदम् अर्थवत्परम्, न सुप्तिङन्तपरम्। 'तिः' अर्थवान्, अतः स एव अत्र कारिकया पदमुच्यते। 'ति' इत्यत्र कर्तृत्वादिरूपः अर्थः, तिप्त्वादिरूपधर्मः च वर्तते। तथा उकारः यद्यपि अनर्थकः, 'तु' इत्यसौ विध्यादिलोडर्थवान्, कर्तृत्व-एकत्वादि-अर्थवान् च। 'ति' इति कर्त्राद्यर्थवतः स्थाने, 'तु' इति विध्याद्यर्थ-विशिष्ट-कर्त्राद्यर्थवतः आदेशः इति अदोषः। तथाच कैयटः - "सर्वपदादेशा इति। पदशब्देन न सुप्तिङन्तं गृह्यते, अपि तु कार्यं प्रीतिपद्यमानं-प्रतीयमानं प्रकृतिप्रत्ययादि तत् सर्वं पदम्॥"(शास्त्री, भार्गवः। भा.१, पृ. २९०) इति। ननु तथाऽपि सर्वोऽयं स्थान्यादेशभाव एव अनित्यत्वस्य आस्पदम् इति चेत्। सत्यम्। अत एव भगवता भाष्यकृता बुद्ध्युदयास्तमोपायः दर्शितः। इदम् अनुपदमेव उपस्थाप्यते।

## अनागमापायिनो नित्याः

"एरुः" (३.४.८६/२१९६) इत्यनेन आनुमानिकौ स्थान्यादेशौ तेस्तुः इति गृह्येते इत्युक्तम्। तेन अवयव-विकार-निबन्धना नित्यत्वहानिः प्रतिविहिता इव। तथाऽपि सूत्रे नित्यत्वभङ्गप्रसङ्गस्तु तदवस्थ एव। अन्यस्य स्थाने विहितः अन्यः शब्दानित्यतां किल जोघुष्यते। पूर्वं भूतस्य स्थाने अपूर्वस्य उपजनिः इति। क्वचित्तु कृत्स्नस्य गमागमः इति ज्यायसी हानिः, यथा धातोः आदेशः, अव्ययस्य आदेशः, पदस्य आदेशः इत्यादिः। एतद् आक्षेप-वार्तिकावतरण-पूर्वकं दर्शितं भाष्ये - "अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात्। स्थानी आदेश इत्येतन्नित्येषु शब्देषु नोपपद्यते॥ किं कारणम्? नित्यत्वात्। स्थानी हि नाम – यो भूत्वा न भवति। आदेशो हि नाम – यो अभूत्वा भवति। एतच्च नित्येषु शब्देषु नोपपद्यते - यत्सतो नाम विनाशः स्यात्, असतो वा प्रादुर्भाव इति॥" (शास्त्री, भार्गवः। भा.१, पृ. ४५३) इति। भाष्यकृता अत्र द्विधा समाधानं दर्शितम्। स्थानशब्दस्य द्वौ अर्थौ। अभूतपूर्वः, पूर्वं भूतश्च। अभूतपूर्वः प्रसङ्गवाची स्थानशब्दः, पूर्वं भूतः निवृत्तिवाची स्थानशब्दः। तत्राद्ये अर्थे लोकस्य वेदस्य च सादृश्यं दर्शयन् समाहितं भाष्यकृता। तथाहि - "सिद्धं तु यथा लौकिकवैदिकेषु अभूतपूर्वेऽपि स्थानप्रयोगात्।" इति वार्तिकम् उदाहृत्य भाष्ये उक्तम् - "सिद्धमेतत्। कथम्? यथा लौकिकवैदिकेषु कृतान्तेषु अभूतपूर्वेऽपि

स्थानशब्दप्रयोगः वर्तते। लोके तावत् - 'उपाध्यायस्य स्थाने शिष्यः' इत्युच्यते, न च तत्र उपाध्यायो भूतपूर्वोऽपि भवति। वेदेऽपि - 'सोमस्य स्थाने पूतीकतृणानि अभिषुणुयात्' इत्युच्यते। न च तत्र सोमो भूतपूर्वो भवति॥" (शास्त्री, भार्गवः। भा.१, पृ. ४५३)। इति। अनेन एतद् उक्तं भवति - अभूतपूर्वः स्थानशब्दः इति पक्षे स्थितं स्थानिनम् अपसार्य आदेशः आविशति इति न अर्थः। शब्दानाम् आगमः अपायः न भवति। स्वभावतः सम्भाव्यस्य विषये शास्त्रेण समुचितः निवेश्यते इत्यर्थः। एवम् अर्थस्वीकारे न कस्यापि शब्दस्य विकारः अपायः वा भवति इत्यतः शब्दनित्यत्वं गोपायितम्। अत्र च दाधाघ्वदाप् इत्यत्र कैयटोक्तं मार्मिकम्। तथाहि - "प्रसङ्गवाची स्थानशब्दो न निवृत्तिवाची, ततश्च सन्त एव प्रयोगे नित्याः शब्दा बुद्ध्युन्मज्जननिमज्जनद्वारेण प्रतिपाद्यन्ते।" (शास्त्री, भार्गवः। भा.१, पृ. २९०) इति॥

## बुद्धिशासनपरं शास्त्रम्

द्वितीयपक्षे अपि भगवता भाष्यकृता दर्शितं समाधानं मनोज्ञम्। तथाहि - "भूतपूर्वे चापि स्थानशब्दो वर्तते। कथम्? बुद्ध्या। तद्यथा कश्चित् कस्मैचित् उपदिशति - 'प्राचीनं ग्रामादाम्राः' इति। तस्य सर्वत्र आम्रबुद्धिः प्रसक्ता। ततः पश्चाद् आह – 'ये क्षीरिणः अवरोहवन्तः पृथुपर्णाः ते न्यग्रोधाः' इति। स तत्र आम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते। स ततः पश्यति - बुद्ध्या आम्राँश्चापकृष्यमाणान्, न्यग्रोधांश्चोपाधीयमानान्। नित्या एव च स्वस्मिन् विषये आम्राः, नित्याश्च न्यग्रोधाः। बुद्धिस्त्वस्य विपरिणम्यते। एवमिहापि अस्तिः अस्मै अविशेषेण उपदिष्टः, तस्य सर्वत्र अस्तिबुद्धिः प्रसक्ता। सः 'अस्तेर्भूः' इत्यनेन अस्तिबुद्ध्या भवतिबुद्धिं प्रतिपद्यते। स ततः पश्यति - बुद्ध्या अस्तिं चापकृष्यमाणं, भवतिं चोपाधीयमानम्, नित्य एव च स्वस्मिन्विषये अस्तिः नित्यः भवतिश्च। बुद्धिस्त्वस्य विपरिणम्यते॥" (शास्त्री, भार्गवः। भा.१, पृ. ४५४) इति।

अपूर्वा, अद्भुता च भगवद्भाष्यकारस्य दृष्टिः। वाक्यशैली च तदीया उपनिषद्वाणीव शास्ति अन्तःकरणम्। भूतपूर्वः स्थानशब्दः इति पक्षे स्थानशब्दस्य अर्थः निवृत्तिः। स्थानं निवृत्तिः अस्य अस्ति इति निवृत्तिमान् स्थानी। स्थानिनः निवृत्तिः आदेशस्य च प्रवृत्तिः यत्र प्रसङ्गे तत्र स्थानिवत्सूत्रेण अतिदेशः क्रियते। ननु पुनश्च स एव दोषः - एकस्य प्रवृत्तिः, अपरस्य निवृत्तिरिति - इति चेत्। न। अत्र प्रवृत्तिः निवृत्तिः च न शब्दस्य, तद्विषयिण्याः बुद्धेः। कुत एतत्? तदुक्तं वार्तिके – "कार्यविपरिणामाद्वा सिद्धम्" (शास्त्री, भार्गवः। भा.१, पृ. ४५३) इति। तत्र भाष्यम् - "किमिदं कार्यविपरिणामाद् इति? कार्या बुद्धिः, सा विपरिणम्यते॥" (शास्त्री, भार्गवः। भा.१, पृ. ४५३) इति। स्पष्टीकुरुते तत् कैयटः प्रदीपे - "अन्यस्य अत्र विपरिणामासम्भवात् सामर्थ्यात् कार्यत्वेन बुद्धिर्गृह्यते न तु कार्यशब्दो बुद्धिपर्यायः॥" इति।

उदाहरणे समन्वयः - इको यणचि इत्यादौ स्थानिविषयिणी बुद्धिः - इग्विषयिणी बुद्धिः, आदौ प्रसरति। विधिशास्त्रेण यण्विषयिणी बुद्धिः आदिश्यते। तेन इग्बुद्धिः संव्रियते, यण्बुद्धिः प्रसार्यते। तत्र स्थानिवत्सूत्रं स्थानिबुद्धिसंश्लिष्टधर्मैः आदेशबुद्धिम् उपस्कुरुते। तेन स्थानिबुद्धिगतधाम्ना परिष्कृता आदेशबुद्धिः समुचितशब्दप्रयोगे मनआदीन् नियुङ्क्ते। ततः साधुशब्दप्रयोगरूपः वाग्यज्ञः सम्पाद्यते इति स्थितिः। एवं साधुशब्दप्रयोगेण धर्मं विन्दति, वर्चस्वी भवति जनः। एवं शब्दानुशासनं वस्तुतः बुद्धिम् अनुशास्ति इति तत्त्वम्। शास्त्राहितसंस्कारः पुरुषः मनोमालिन्यं बुद्धिजाड्यं च उज्झित्वा शुद्धिम् आपन्नया बुद्ध्या परमार्थे अधिकारी भवितुम् अर्हति। क्षीणदोषा बुद्धिः आत्मप्रवणा भवति। क्रमेण शुद्धबुद्धौ आत्मप्रकाशः स्वयम् आविर्भवति। तेन व्याकरणाध्येता आविर्भूतप्रकाशः, अनुपप्लुतचेताः च महीयते। इत्थं पदशास्त्रम् आत्मपदप्रापकं विजयते। हरिणाऽपि अवादि - "तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्। पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥" (शुक्लः, रामगोविन्दः। का.१, श्लो.१४, पृ.२४) इति, "तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते॥" (शुक्लः, रामगोविन्दः। का.१, श्लो.२२, पृ.३०) इति च। हरिवचनं न केवलम् अर्थवादः, वस्तुतत्त्वसंश्लिष्टञ्च प्रतीयते।

## जीवनोपयोगिदर्शनम्

महाभाष्यकारस्य भगवतः पतञ्जलेः इदम् अनितरसाधारणं वैशिष्ट्यं यत् लोकाद्, जनजीवनात् उदाहरणानि उपादत्ते। शास्त्रे जटिलम्, ग्रन्थिलं विषयं जनबोधसुलभेन जगदुदाहरणेन परिजिहीर्षति। महाभाष्यपाठेन न वाण्येका संस्क्रियते, अपि तु मनः, बुद्धिः, सङ्कल्पाः इत्येवं समग्रः आत्मा संस्क्रियते। श्रद्धया विहितं महाभाष्याध्ययनं जने बुद्धितीक्ष्णताम्, ज्ञानप्रोढिमानम्, हृत्परिपाकं च आदधाति इत्यत्र नास्ति संशयलेशः। व्याकरणसूत्रैः यद्यपि शब्दसाधुत्वचिन्ता प्राधान्येन क्रियते तथाऽपि विद्यते तत्र कश्चन ध्वनिः यः जीवनोपयोगी भवितुम् अर्हति। तद्यथा स्थानिवत्सूत्रे -

आदेशः स्थानिवत् आपाद्यते सूत्रेण। स्यादेतत् - लोके स्वभावतः जनमनस्सु उपस्थिताः रागद्वेषादयः। "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" (गम्भीरानन्द, स्वामी। अ.९, श्लो.८, पृ.१८०) इत्यादि-वचनात्। रागादीनां प्रसङ्गे भक्ति-ज्ञानादयः अतिदिश्यन्ते उपदिश्यन्ते शास्त्राचार्यैः। यदैव मनसि रागद्वेषादीनां प्रसङ्गः ततः मनः संयम्य भक्तिज्ञानादिम् अनुसन्दधीत इति आदिश्यते। तथाहि - "मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥" (गम्भीरानन्द, स्वामी। अ.६, श्लो.६१४, पृ.), "बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥" (गम्भीरानन्द,

स्वामी। अ.१८, श्लो.५७, पृ.) १८.५७ इत्यादिभगवद्वचनानि। स्थानिधर्माः आदेशेषु आरोप्यन्ते। रागद्वेषादीनां ये धर्माः उत्साहः दृढबद्धादरः इत्यादयः ते सर्वे भक्ति-ज्ञानादिषु आरोप्यन्ते। मुमुक्षुः ध्यानकीर्तनादिषु उत्सहते, भगवत्कर्मसु सन्नद्धपरिकरो भवति। आदेशः स्थानिवद् भवति। भक्तिभावादिः कामक्रोधादिवत् भवति। तस्यायम् आशयः - कामक्रोधादयः विषयसुखस्य मूलम्, भक्तिभावादयः भगवत्सुखस्य मूलम्। इदं च सुखं भजनानन्दः इति प्रसिद्ध्यति योगशास्त्रेषु। "बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्। स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥" (गम्भीरानन्द, स्वामी। अ.५, श्लो.२१, पृ.२६१) इत्यादिवचनानि अत्र प्रमाणम्। अनेन अर्थयोगेन भक्त्यादिः कामादिवत्, न तु विषयज्वरादिना। अलाश्रयविधौ प्रतिषेधः उक्तः। अल् भाषायाः पदवाक्यादिरूपायाः घटकः, तद्-वृत्तिधर्मातिदेशे प्रतिषेधः अनल्विधौ इति। कामक्रोधादीनां घटकाः सत्त्वरजस्तमोगुणाः, तद्-वृत्तिधर्माः सुख-कर्म-प्रमादादयः। "सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत। ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥" (गम्भीरानन्द, स्वामी। अ.१४, श्लो.९, पृ.५७५) इति वचनात्। सुख-कर्म-प्रमादादयः न भक्त्यादिषु अतिदिश्यन्ते। भक्त्यादयस्तु गुणत्रयजन्यदोषातिक्रमणे सहायाः भवन्ति। "मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते॥" (गम्भीरानन्द, स्वामी। अ.१४, श्लो.२६, पृ.५८९) इत्यादिवचनप्रामाण्यात्। ननु भक्त्यादावपि रजस्तमोगुणानाम् आरोपः उक्तः - राजसी भक्तिः, तामसी भक्तिः इत्यादिवचनैः इति चेत्। सत्यम्। किन्तु अनेन गुणत्रयजन्यदोषाः न संश्लिष्यन्ते भक्त्यादिषु। स्वभावतः भक्त्यादीनां तद्विरोधत्वात्। अन्यच्च, गुणत्रयम् बध्नाति मानवम् भक्त्यादिस्तु विघटयति बन्धनम् इति स्थितिः। अतः अनल्विधिप्रतिषेधतत्त्वं सङ्गच्छते सुतराम्। एवम्प्रकारेण अनुसन्धित्सूनां व्याकरणादिशास्त्राध्ययनं निजजीवनं च नातीव अपरस्परव्यावृत्तं भायात्। अतः युक्तमुक्तं शास्त्रमात्रम् आत्मज्ञानावतारार्थम् इति।

अथवा - प्रत्यक्तत्त्वं स्थानी। तत्र बुद्ध्यादयः आदिष्टाः पदार्थाः। आत्मनि बुद्ध्यादयः आरोपिताः इति ब्रुवते वेदान्तिनः। सेयं पद्धतिः तेषाम् अध्यारोपापवादनाम्ना प्रथते। आदेशः स्थानिधर्मान् लभते। आत्मनि प्रत्यक्तत्त्वे आरोपिताः आदेशरूपाः बुद्ध्यादयः स्थानिवत् आचरन्ति - चैतन्यवत् भान्ति। सदाभासः चिदाभासः आनन्दाभासः बुद्ध्यादिषु उपलभ्यन्ते इत्यतः विषयान् प्रकाशयन्ति इव, कार्याणि निर्वर्तयन्ति इव दृश्यन्ते। तत्राऽपि अनल्विधिप्रतिषेधः द्रष्टुं शक्यः। प्रत्यक्तत्त्वस्य मूलस्वरूपम् आश्रित्य यद् उच्यते तद् न अन्वेति अतिदिष्टेषु। मूलस्वरूपं सत् चित् आनन्दः च। न बुद्ध्यादीनां वास्तविकी सत्ता विद्यते, न वा ते स्वयं प्रकाशाः, जडेषु आनन्दवार्ता वा कुत? आत्मनि प्रपञ्चोपशमः। नासौ धर्मः बुद्ध्यादिषु अतिदेष्टुं शक्यः। प्रपञ्चोपबृंहणम् एव दृश्यते बुद्ध्यादिषु। एवञ्च स्थानिनः मूलस्वरूपम् आश्रित्य प्रवृत्ताः व्यवहाराः कथमपि अतिदिष्टेषु बुद्ध्यादिषु न अन्वयन्ति इति सङ्गतम् अनल्विधितत्त्वम्। एवंरूपेण प्रायोगिकस्तरे स्थानिवत्सूत्रतत्त्वस्य अनुसन्धानं नातीव दुष्करम्। दार्शनिकं तत्त्वं शास्त्राध्ययनेन आचार्योपदेशेन च उन्नेतुं शक्यम्।

उपसंहारः

एवं बह्वर्थसमर्थं स्थानिवत्सूत्रं चमत्कारि चकास्ति। स्थानिवद्भावनिष्कर्षम् अन्तरा अन्तरायहता एव छात्राः। कालिदासस्य तोयनिधी वगाह्य स्थितः मानदण्डः इव पाणिनीयोऽयं सूत्रदण्डः प्रक्रियाप्रपञ्चं प्रपञ्चोपशमदर्शनम् इति उभयम् अवगाह्य स्थितम्। मुनित्रयमतम् अनु स्थानिवद्भावाभिव्याप्तिम् अनुसन्दधानाः अध्येतारः समेधन्ते। शब्दशासनव्याजेन शास्त्रम् इदं बुद्धिम्, समग्रम् आत्मानं[2] च शास्ति इति सत्यादनपेतं वचः। इत्थं पाणिनायसूत्राध्ययनं दृष्टादृष्टफलप्रदम् अभ्युदयनिःश्रेयससाधनम् इति शम्।

## सङ्क्षेपाक्षरार्थनिर्देशिनी

का. - काण्डम्
प.शे. - परिभाषेन्दुशेखरः।
परिभा. - परिभाषा।
पृ. - पृष्ठसङ्ख्या।
भा. - भागः/खण्डः।
ल.शे. - लघुशब्देन्दुशेखरः।
व्या. - व्याख्याता।
श्लो. - श्लोकः
सं. - सम्पादकः।
संक. - सङ्कलनकर्ता/-कर्त्री
सि.कौ - वैयाकरणसिद्धान्तकौमुदी।
सू.- सूत्रम्।

## आश्रितग्रन्थावलिः


**जालमूलम्**

अद्वैतशारदा, https://advaitasharada.sringeri.net/ (शिष्टप्रयोगदिदृक्षया असकृत् यातम्। यथा ६.५.२०२० दिनाङ्के अपराह्णे १.३० वादने)

अष्टाध्यायी। http://ashtadhyayi.com/ (यथा ८.५.२०२० दिनाङ्के अपराह्णे २ वादने)


[2]शरीरेन्द्रियमनोबुद्धिसङ्घातरूपः इत्यर्थे आत्मशब्दः अत्र। आधुनिकाः Personality इति यद्वदन्ति तदेव संस्कृते आत्मशब्देन व्यपदिश्यते।

वाचस्पत्यम्। https://www.sanskrit-lexicon.uni-koeln.de/scans/VCPScan/**2020/**web/index. php (यथा ०६.५.२०२० दिनाङ्के सायम् ६.२० वादने)

शब्दकल्पद्रुमः। https://www.sanskrit-lexicon.uni-koeln.de/scans/SKDScan/**2020/**web/index. php **(**यथा ०९.५.२०२० दिनाङ्के सायम् ६.४० वादने)

## पुस्तकमूलम्

1. कृष्णाचार्य, टि.आर्। सं.। नागराजभट्टः। सं.। बृहद्धातुरूपावलिः। श्रीशङ्कर अद्वैतशोधकेन्द्रम्। शृङ्गेरी। २०११ पुनर्मुद्रण।
2. गम्भीरानन्दः, स्वामी। अनु.। श्रीमद्भगवद्गीता (आङ्ग्लानुवादसहिता)। अद्वैत आश्रम। कलिकता। २००० पञ्चमं मुद्रणम्॥
3. त्रिपाठी, जयशङ्करलाल। सं.। सुधाकर मालवीय। सं.। काशिका। प्रथमो भागः। तारा प्रिंटिंग वर्क्स। वाराणसी। १९८५।
4. त्रिपाठी, रामप्रसाद। संक.। सं.। शिक्षासंग्रहः। हरीश चन्द्र मणि त्रिपाठी। सम्पूर्णानन्दसंस्कृतविश्वविद्यालय। वाराणसी। १९८९ प्रथमं संस्करणम्।
5. पञ्चोलि, बालकृष्णशर्मा। सं.। वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीव्याख्योपेता)। मोतीलाल बनारसीदास। वाराणसी। १९६६ प्रथमसंस्करणम्। (पुस्तकरूपेण नोपलब्धम्, pdf -रूपेण प्राप्तम्)
6. लक्ष्मीनरसिंहः, श्रिष्टि। पाणिनीये अतिदेशानुशीलनम्। राष्ट्रियसंस्कृतविद्यापीठम्। तिरुपति। २००८॥
7. शर्मा, गिरिधर। सं.। परमेश्वरानन्द शर्मा। सं.। वैयाकरणसिद्धान्तकौमुदी। बालमनोरमा-तत्त्वबोधिनीसहिता। प्रथम-द्वितीय-तृतीय-चतुर्थ-भागाः। मोतिलाल बनारसीदास। दिल्ली। प्रथमः-२०१४ द्वादश मुद्रण, द्वितीयः-२०१७ नवम मुद्रण, तृतीयः-२०११ नमव मुद्रण, चतुर्थः-२०११ षष्ठ मुद्रण॥
8. शर्मा, रघुनाथ। सं.। वाक्यपदीयम्। द्वितीयो भागः। सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः। वाराणसी। २०१६ तृतीय संस्करणम्॥
9. नेने, गोपाल शास्त्री। सं.। शब्दकौस्तुभः। प्रथमाध्यायस्य प्रथमपादो नवाह्निकपर्यन्तः प्रथमो भागः। चौखम्बा संस्कृत सीरिज़ आफिस। बनारस सिटी। १९९०॥
10. शास्त्री, बाल। सं.। गुरुप्रसादशास्त्री। संक.। व्या.। लघुशब्देन्दुशेखरः। पञ्चसन्ध्यन्तः प्रथमः भागः। चौखम्बा सुरभारती प्रकाशन। वाराणसी। २०१३ संस्करणम्॥
11. शास्त्री, भार्गवः। सं.। व्याकरणमहाभाष्यम्। १-६ भागाः। चौखम्बा संस्कृत प्रतिष्ठान। दिल्ली। २०१४ पुनर्मुद्रितसंस्करणम्।
12. शास्त्री, भीमसेनः। अनु.। व्या.। लघुसिद्धान्तकौमुदी। १-६ भागाः, भैमी प्रकाशन। दिल्ली। २०१४ अष्टम संस्करण॥
13. शास्त्री, सदाशिव। सं.। परिभाषेन्दुशेखरः। चौखम्भा संस्कृत संस्थान। वाराणसी। १९८७ पंचम संस्करण॥
14. शुक्लः, रामगोविन्दः। सं.। व्या. (हिन्दी)। वाक्यपदीयम् (ब्रह्मकाण्डम्)। चौखम्भा संस्कृत संस्थान। वाराणसी। २०१२ पुनर्मुद्रितसंस्करणम्।
15. शुक्लः, हरिरामः। सं.। न्यायसिद्धान्तमुक्तावली। चौखम्बा संस्कृत संस्थान। वाराणसी। १९८९ चतुर्थं संस्करणम्।
16. सप्ततीर्थ, भूतनाथ। अनु. (वङ्गभाषया)। व्या.। मीमांसादर्शनम्। वसुमती साहित्य मन्दिर। कलिकता। मुखपुटे मुद्रणवर्षं न दर्शितम्। प्रस्तावनायाः संवत्सरः १९४१। भागः- २, अध्यायः-८, सूत्रम् - १.२ – "यस्य लिङ्गम् अर्थसंयोगाद् अभिधानवत्।", पृ.२५१